JSUNIL TUTORIAL
Chase Excellence

# सङ्कलनात्मकं मूल्याङ्कनम् - I (2015-16)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - दशमी

**समय : होरात्रयम्** **पूर्णाङ्कः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् - **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् - **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् - **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (2 + 2 + 4 + 2) 10

भारतीयजनानां पाश्चात्त्यं प्रति महत् आकर्षणम् आसीत्, अस्ति, एवं भविष्यति अपि च। विचारणीयः विषयः तु अयमेव अस्ति यत् किमर्थं जनाः पाश्चात्त्यं प्रति आकर्षिताः भवन्ति। किं स्वदेशे सर्वसुविधाः न सन्ति? किं कारणम् अत्र? अत्र अपि आवासव्यवस्था तादृशी एव उत्तमा अस्ति यादृशी अन्येषु देशेषु च। कदा सः कालः आगमिष्यति यदा जनाः विदेशगमनस्य इच्छां त्यक्त्वा स्वदेशे एव तिष्ठन्तः स्वज्ञानस्य प्रयोगं कृत्वा देशम् उन्नेष्यन्ति।

**(I) एकपदेन उत्तरत।**

(i) के पाश्चात्त्यं प्रति आकर्षिताःसन्ति?

(ii) सम्प्रति कुत्र गमनाय-भारतीयजनानां महती इच्छा अस्ति।

**(II) पूर्णवाक्येन उत्तरत।**

(i) कः विचारणीयः विषयोऽस्ति?

(ii) जनाः कदा देशम् उन्नेष्यन्ति?

**(III) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं निदशानुसारं चित्वा लिखत।**

(i) 'उन्नेष्यन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) जनाः (ब) सर्वसुविधाः

(स) आकर्षिताः (द) कालः

(ii) 'आकर्षणम्' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(अ) तादृशी (ब) उत्तमा

(स) महत् (द) यादृशी

(iii) ''गमिष्यति'' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(अ) भविष्यति (ब) उन्नेष्यन्ति

(स) आगमिष्यति (द) अस्ति

(iv) 'आवासव्यवस्था' इति कर्तृपदस्य क्रियापदं किम्?

(अ) भवन्ति (ब) सन्ति

(स) उन्नेष्यन्ति (द) अस्ति

**(IV) अस्य अनुच्छेदस्य कृते एकम् उपयुक्तं शीर्षकं लिखत।**

## खण्डः 'ख'

## रचनात्मक-कार्यम् - ( 15 अङ्काः )

2 **भवतः नाम राकेशः। भवान् छात्रावासतः स्वभ्रातरं प्रति पत्रं लिखति। तस्य संस्कृतविषये महतीम् उत्कण्ठां शमयितुं लिखितम् इदं पत्रं मञ्जूषायां प्रदत्तैः उचितैः शब्दैः पूरयित्वा पुनः लिखत। ( ½ x10)** 5

नवदिल्ली छात्रावासतः

तिथिः ---------

प्रियभ्रातः सुनील!

__(i)__ भव।

अद्य मया __(ii)__ पत्रम् प्राप्तम्। अहम् इदं __(iii)__ अतीव प्रसन्नः अभवम् यत् __(iv)__ तव महती अभिरुचिः अस्ति। संस्कृतभाषा __(v)__ भाषाणाम् जननी अस्ति। संस्कृत भाषा सर्वासु __(vi)__ प्राचीनतमा भाषा अस्ति। संस्कृतस्य विषये तव __(vii)__ अंकान् श्रुत्वा तु सर्वे प्रसन्नाः अभवन्। मनोयोगेन भवान् __(viii)__ अध्ययनं करोतु इति मम निवेदनम्। मातृचरणयोः मम __(ix)__ कथयतु।


भवतः भ्राता

__(x)__

**मञ्जूषा**

भाषासु, शतप्रतिशतम्, ज्ञात्वा, राकेशः, सुखी, तव, संस्कृतविषये, सर्वासां, वन्दनानि, संस्कृतभाषायाः

3 **चित्रं वीक्ष्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च संस्कृतवाक्यानि रचयत।** 10



JSUNIL TUTORIAL
Chase Excellence

**मञ्जूषा**

चलभाषित्रयन्त्रम् (मोबाइलफोन), मोटरसाइकिलयानेन, दुरुपयोगः, घातकः, दुर्घटना, मार्गे, यात्रायां, सम्भाविता, नियमस्य, सहसा, उल्लंघनम्, दण्डनीयः

**अथवा**

**'मार्ग-सुरक्षा' विषयम् अधिकृत्य मञ्जूषापदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।** 10

**मञ्जूषा**

यातायातसंकेतान्, रक्त, पीत, हरित, विद्युत्संकेतान्, अवधानेन, वाहनचालनसमये, पदयात्री, जीवनघातकाः, परिणामाः, इतस्ततः, दृष्ट्वा, वामतः, दक्षिणतः, पालनीयः।

JSUNIL TUTORIAL
Chase Excellence

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )

**अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत।** 5

(i) अस्माभिः शिष्टाचारः पालनीयः।

(ii) 'सर्वे सुखिनः भवन्तु' इत्येव प्रार्थना+एषा मम।

(iii) मया एषा कथा हृदयङ्गता।

(iv) यत् करणीयं तत्+श्रूयताम्।

(v) दरिद्राय दानं हरिर्यच्छति।

5 **अधोलिखितवाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 6

(i) वेदाध्यापकः छात्रान् नैतिकमूल्यान् पाठयति।

(अ) वेदे अध्यापकः (ब) वेदानाम् अध्यापकः

(स) वेदान् अध्यापकः (द) वेदम् अध्यापकः

(ii) हनुमान् महावीरः अपि कथ्यते।

(अ) महत् वीरः (ब) महा वीरः

(स) महावीरः (द) महान् वीरः

(iii) शिक्षा द्विमुखी प्रक्रिया अस्ति।

(अ) द्वयोः मुखयोः समाहारः (ब) द्वयस्य मुखस्य समाहारः

(स) द्वि मुखी समाहारः (द) द्वयाणां मुखानां समाहारः

(iv) चित्रं करोति इति प्राकृतिकदृश्यं दृष्ट्वा प्रसीदति।

(अ) चित्रकारे (ब) चित्रकारः

(स) चित्रकरोति (द) चित्रकारम्

(v) श्रीकृष्णस्य वर्णः घनः इव श्यामः आसीत्।

(अ) घनश्यामम् (ब) घनश्यामा

(स) घनश्यामः (द) घनश्यामे

(vi) यत्र पञ्च नद्यः भवन्ति, तत् स्थानं पञ्चानां नदीनां समाहारः कथ्यते।

(अ) पञ्चनदीः (ब) पञ्चनदी

(स) पञ्चनद्यः (द) पञ्चनदम्

6 **अधोलिखितवाक्येषु रेखाङ्‌कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं लिखत।** 5

(i) सेना+ठक् युद्धस्थलं गच्छन्ति।

(ii) भक्ति+मतुप् देवालयं गच्छन्ति।

(iii) राज्ञः शिवेः अर्थिनः सन्तोषम्भजन्ते।

(iv) अस्माभिः मातृभूमिः रक्ष्+अनीयर्।

(v) सर्वदैव स्वच्छं जलं पातव्यम्।

7 **अधोलिखितेषु वाक्येषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 5

(i) अयं वृद्धः _____ चलति।

(ii) _____ त्वम् किं करोषि?

(iii) यः रात्रौ आगच्छत् _____ सः चौरः एव आसीत्।

(iv) _____ कुरुक्षेत्रे महाभारतस्य युद्धम् अभवत्।

(v) रमेशस्य अनुजा _____ वदति।

**मञ्जूषा**

नूनम्, पुरा, उच्चैः, शनैः, अधुना

8 अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत। 5

रमा – लते! ___(i)___ कुत्र गच्छसि?
लता – मया देवालयं ___(ii)___।
रमा – ___(iii)___ अपि देवालये उत्सवं पश्यामः।
लता – तत्र अस्माभिरपि ___(iv)___ दृश्यते।
रमा – लते! त्वम् अवकाशस्य सदुपयोगं करोषि।
लता – रमे! आवाभ्याम् एव अवकाशस्य सदुपयोगः ___(v)___।

9 अधोलिखितवाक्येषु अङ्कानां स्थाने समयसूचकसंस्कृतसंख्यापदं लिखत। 4

(i) प्रातः ___________10.00 वादने उद्घाटनसमारोहः।
(ii) प्रातः ___________11.30 वादने भाषणानि।
(iii) मध्याह्ने ___________12.45 वादने पुरस्कार वितरण समारोहः।
(iv) मध्याह्ने ___________2.15 वादने समापन समारोहः।

## खण्ड : 'घ'
## पठित-अवबोधनम् – 35 अङ्काः

10 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।(2+1+2) 5

ज्वाल्मालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धा केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः। दग्धां हयशालां विज्ञाय सविषादः राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत्— 'हा ! दग्धाः मे घोटकाः कथं रक्षणीयाः? सपदि उपायः क्रियताम्।'

I. एकपदेन उत्तरत।
(i) दग्धाः अश्वाः किमर्थम् अधावन्?
(ii) शालिहोत्रज्ञाः के आसन्?

II. पूर्णवाक्येन उत्तरत।
राजा वैद्यान् आहूय किम् अपृच्छत्?

III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत –
(i) ''अधावन्'' इति क्रियापदस्य कर्तृपदं किम्?
(अ) दग्धाः (ब) अश्वाः (स) राजा (द) राजवैद्यः
(ii) 'तेषु केचन च पञ्चत्वं गताः' अत्र 'तेषु' इति सर्वनामपदं केभ्यः प्रयुक्तम्?
(अ) राजभ्यः (ब) राजवैद्येभ्यः
(स) अश्वेभ्यः (द) ज्वालेभ्यः

11 **अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत।(2+1+2)**

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी।।

I. **एकपदेन उत्तरत।**

(i) कीदृशी वाणी पुरुषं प्रह्लादयति?

(ii) वाणी इव शीतलाछाया कं न प्रह्लादयति?

II. **पूर्णवाक्येन उत्तरत।**

वाणी केभ्य: अधिकं पुरुषं प्रह्लादयति?

III. **अधोलिखितयो: प्रश्नयो: उत्तरं समुचितेभ्य: विकल्पेभ्य: चित्वा लिखत –**

(i) छायाया: विशेषणपदं किम्?

(अ) शीतला (ब) शीतलं
(स) सलिलं (द) सलिल

(ii) 'तोषयति' इत्यर्थे अत्र किम् पदं प्रयुक्तम्?

(अ) छाया (ब) प्रह्लादयति
(स) यथा (द) वाणी

12 **अधोलिखितनाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।(2+1+2)** 5

अर्जुन: – हे कृष्ण! इदं मन: अतीव चञ्चलं च शरीरस्य मथनकर्ता, बलवत्सु बलवान् अपि अस्ति। अत: अहम् तस्य नियन्त्रणं वायो: इव दुष्करम् मन्ये।

कृष्ण: – हे महाबाहो अर्जुन! मन: अतीव काठिन्येन ग्रहणीयम् चञ्चलं चास्ति। एतत् अभ्यासेन, वैराग्येण च एव गृह्यते।

I. **एकपदेन उत्तरत।**

(i) चञ्चलं किम् अस्ति?

(ii) कृष्ण: अर्जुनम् किम् कथयित्वा सम्बोधयति?

II. **पूर्णवाक्येन उत्तरत।**

मनस: वशीकरणं कस्य इव दुष्करम्?

III. **निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेभ्य: चित्वा लिखत।**

(i) 'सुकरम्' इति अस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(अ) कठिनम् (ब) निग्रहम्
(स) दुष्करम् (द) सुदुष्करम्

(ii) 'मन्ये' इति क्रियापदस्य कर्तृपदं किम्?

(अ) अहम् (ब) दुष्करम्
(स) तस्य (द) वायो:

13 **मञ्जूषात: उचितपदानि चित्वा अधोलिखितश्लोकयो: भावार्थौ पूरयत।( ½x8)** 4

I. तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारण:।

तदगृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।

भावार्थः - कलहयुक्तं गृहं विनाशस्य कारणम् भवति तस्मात् यस्मिन् ___(i)___ कारणं विना, कलहः भवति तं ___(ii)___ जीवितम् ___(iii)___ जनः ___(iv)___ त्यजेत्।

JSUNIL TUTORIAL
Chase Excellence

II. कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्।।

भावार्थः - कलहः ___(v)___ नाशयति, कुवाक्यानां प्रयोगः ___(vi)___ नाशयति ___(vii)___ राष्ट्राणि नाशयति। एवम् एव यदि मानवः कुकर्म करोति तदा तेषां ___(viii)___ नश्यति।

**मञ्जूषा**

कुराजा, गृहं, दूरतः, मित्रतां, यशः, इच्छन्, गृहे, राजभवनानि

**14 मञ्जूषातः समुचितं पदं चित्वा अधोलिखितयोः श्लोकयोः अन्वयं पूरयत।** 4

क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।

**अन्वयः** - क्रोधात् ___(i)___ भवति, सम्मोहात् ___(ii)___ स्मृतिभ्रंशात् ___(iii)___ (भवति) बुद्धिनाशात् (सः नरः) ___(iv)___ ।

**मञ्जूषा**

प्रणश्यति, बुद्धिनाशः, सम्मोहः, स्मृतिविभ्रमः

**15 वाक्येषु रेखाङ्कितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत।** 4

(i) अधिगततत्त्वः गुरुः।
(ii) धनं जलवत्तरलं भवति।
(iii) दृष्टादृष्टलाभाढ्ये न्याय्ये पथि स्थातव्यम्।
(iv) यः सत्यवादी प्रियवादी च तस्य वशे सर्वे जनाः।

**16 अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनः लेखनीयानि।(½ x 8)** 4

(i) सः एकदा राजा अभवत्।
(ii) देशान्तरेभ्यः अपि जनाः तं देशम् आयान्ति स्म।
(iii) तत्र सः अर्थिनां विरलाम् संख्याम् अपश्यत्।
(iv) जनाः दानं प्राप्य सन्तुष्टाः अभवन्।
(v) बोधिसत्त्वः बाल्यात् एव दयालुः आसीत्।
(vi) सः नगरस्य समन्ततः दानशालाः अकारयत्।
(vii) एकदा राजा दानशालासु विचरति स्म।
(viii) सः प्रजाः पुत्रवत् अपालयत्।

17 रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत। 4

(i) शरीरविमोक्षणात् प्राक् परोपकारं चर।

(अ) वाणी (ब) वाक् (स) पूर्वम् (द) पश्चात्

(ii) राज्ञः स्वेषु गात्रेषु अपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

(अ) अङ्गेषु (ब) नेत्रयोः (स) ग्रीवायाम् (द) प्रजासु

(iii) सूपकाराः मेषं काष्ठेन ताडितवन्तः।

(अ) अनलः (ब) पाचकाः

(स) महानसः (द) कपयः

(iv) सततम् शिष्यहिताय उद्यतः अधिगततत्वः गुरुः।

(अ) अनुचितः (ब) निरन्तरम्

(स) उपादेयम् (द) जीवितम्

-o0o0o0o-